# महाकविः माघः

---

## वस्तुनिष्ठप्रश्नाः

**प्रश्न 1. भारविकवेः रचना अस्ति**

(क) किरातार्जुनीयम्
(ख) शिशुपालवधम्
(ग) नैषधीयचरितम्
(घ) मेघदूतम्

**उत्तरः** (क) किरातार्जुनीयम्

**प्रश्न 2. माघस्य पितुः नाम आसीत्**

(क) सुप्रभदेवः
(ख) दत्तकः
(ग) भोजः
(घ) विक्रमः

**उत्तरः** (ख) दत्तकः

**प्रश्न 3. माघस्य जीवनवृत्तं लिखितम् अस्ति –**

(क) शिशुपालवधे
(ख) मेघदूते
(ग) भोजप्रबन्धे
(घ) किरातार्जुनीये

**उत्तरः** (ग) भोजप्रबन्धे

**प्रश्न 4. माघस्य आश्रयदाता आसीत्**

(क) वर्मलातः
(ख) सुप्रभदेवः
(ग) विक्रमः
(घ) भोजः

**उत्तरः** (घ) भोजः

**प्रश्न 5. शिशुपालवधे सर्गाः सन्ति**

(अ) विंशतिः
(ब) त्रयः
(स) अष्टादश
(द) षोडश

**उत्तर:** (अ) विंशतिः

## लघूत्तरात्मक प्रश्नाः

**प्रश्न 1. राजस्थान कीदृशानां जनानां भूमिः अस्ति?**

**उत्तर:** वीराणां भक्तानां विदुषां महाकवीनाञ्च।

**प्रश्न 2, माघस्य जन्म कुत्र अभवत्?**

**उत्तर:** राजस्थानस्य जालौरजनपदान्तर्गते भीनमालनगरे।

**प्रश्न 3. शिशुपालवधस्य नायकः कः अस्ति?**

**उत्तर:** श्रीकृष्णः

**प्रश्न 4. शिशुपालवधस्य कथायाः आधारः किम् अस्ति?**

**उत्तर:** महाभारतम् (सभापर्वः)

**प्रश्न 5. माघस्य काव्ये कति गुणाः सन्ति?**

**उत्तर:** त्रयोः गुणाः सन्ति।

## निबन्धात्मक प्रश्नाः

**प्रश्न 1. माघस्य जीवनवृत्तस्य वर्णनं कुरुत।**

**उत्तर:** शिशुपालवधस्य रचयितामहाकवेः माघस्य जन्म राजस्थानस्य जालौरजनपदान्तर्गते भीनमालनगरे श्रीमालीब्राह्मणपरिवारे विक्रमस्य सप्तमशताब्द्याम् अभवत्। अस्य पितामहः सुप्रभदेवः राज्ञः वर्मलातस्य प्रधानमन्त्री आसीत्। माघस्य पिता दत्तकः विद्वान् दानशीलः चासीत्। पितृवत् माघोऽपि विद्वान् दानशीलः चासीत्। राजा भाजः माघस्य आश्रयदाता मित्रं चासीत्। एकदा दानशीलः माघः निर्धनः जातः।

निर्धनताकारणात् यदा माघस्य समीपे याचकानां कृते धनं नासीत् तदा तेन सः बहु-दु:खितः भूत्वा स्वप्राणान् एव अत्यजत्।

**प्रश्न 2. शिशुपालवधस्य काव्यवैशिष्ट्यं लिखत।**

**उत्तर:** शिशुपालवधस्य महाकाव्यस्य वैशिष्ट्यात् एव अस्य गणना संस्कृतसाहित्ये बृहत्त्वय्यां क्रियते। अस्मिन् काव्ये उपमा, अर्थगौरवं पदलालित्यञ्च त्रयो गुणाः सन्ति। अस्य महाकाव्यस्य यथा भावपक्ष : प्रशस्यः, तथैव कलापक्षोऽपि प्रशस्यातिप्रशस्यतमः। अलङ्काराणां प्रयोगे, छन्दोरचनाकौशले, करणनैपुण्यप्रदर्शने, कोमलकान्तपदावल्याः संधाने शास्त्रीयज्ञानप्रतिपादने च सर्वत्रापि काव्येऽस्मिन् कवेः माघस्य वैदुष्यं सुस्पष्टं प्रतिभाति।

## व्याकरणात्मक प्रश्नाः

**प्रश्न 1. अधोलिखितपदेषु धातु-लकार पुरुष-वचनानां निर्देशं कुरुत**

**उत्तरः**

| पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| अभवत् | भू | लङ् | प्रथमः | एकवचनम् |
| आसीत् | अस् | लङ् | प्रथमः | एकवचनम् |
| आसन् | अस् | लङ् | प्रथमः | बहुवचनम् |
| अस्ति | अस् | लट् | प्रथमः | एकवचनम् |
| सन्ति | अस् | लट् | प्रथमः | बहुवचनम् |
| गच्छति | गम् | लट् | प्रथमः | एकवचनम् |
| ददाति | दा | लट् | प्रथमः | एकवचनम् |
| अत्यजत् | त्यज् | लङ् | प्रथमः | एकवचनम् |

**प्रश्न 2. अधोलिखितपदेषु शब्द-विभक्ति-वचनानां निर्देशं कुरुतड**

**उत्तरः**

| पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| माघस्य | माघ | षष्ठी | एकवचनम् |
| नगरस्य | नगर | षष्ठी | एकवचनम् |
| दत्तकस्य | दत्तक | षष्ठी | एकवचनम् |
| भक्तानां | भक्त | षष्ठी | बहुवचनम् |

| | | | |
|---|---|---|---|
| वीराणां | वीर | षष्ठी | बहुवचनम् |
| कवे: | कवि | षष्ठी | एकवचनम् |
| विदुषां | विद्वस् | षष्ठी | बहुवचनम् |
| गृहे | गृह | सप्तमी | एकवचनम् |
| याचकेभ्य: | याचक | चतुर्थी | बहुवचनम् |

**प्रश्न 3. अधोलिखितपदेषु प्रत्ययस्य निर्देशनं कुरुत**

**उत्तर:**

| | | | | |
|---|---|---|---|---|
| लिखितम् | - | लिख् | + | क्त |
| जात: | - | जन् | + | क्त |
| स्वीकृत्य | - | स्वी, कृ | + | ल्यप् |
| भूत्वा | - | भू | + | क्त्वा |
| दृष्ट्वा | - | दृश् | + | क्त्वा |

**प्रश्न 4. अधोलिखितपदेषु समासविग्रहंकृत्वा समासस्य नामनिर्देशनं कुरुत**

**उत्तर:**

| | | | |
|---|---|---|---|
| आश्रयदाता | - | आश्रयस्य दाता | (षष्ठी तत्पुरुष:) |
| भोजसमीपे | - | भोजनस्य समीपे | षष्ठी तत्पुरुष: |
| अर्थगौरवं | - | अर्थस्य गौरवम् | षष्ठी तत्पुरुष: |
| पदलालित्यं | - | पदानां लालित्यम् | षष्ठी तत्पुरुष |
| जीवनवृत्तं | - | जीवनस्य वृत्तम् | षष्ठी तत्पुरुष: |

**प्रश्न 5. अधोलिखितपदेषु काल (लकार) परिवर्तनं कुरुत**

**उत्तर:**

| | | | |
|---|---|---|---|
| अभवत् | - | (लट्) | भवति |
| आसीत् | - | (लट्) | अस्ति |
| गच्छति | - | (लङ्) | अगच्छत् |
| अत्यजत् | - | (लट्) | त्यजति |
| ददाति | - | (लृट्) | दास्यति |
| आगच्छति | - | (लृट्) | आगमिष्यति |
| सन्ति | - | (लङ्) | आसन्. |

**प्रश्न 6. अधोलिखितपदेषु वचनपरिवर्तनं कुरुत**

**उत्तर:**

| | | | |
|---|---|---|---|
| कवे: | – | (बहुवचनम्) | कवीनाम् |
| भक्तानां | – | (एकवचनम्) | भक्तस्य |
| वीराणां | – | (एकवचनम्) | वीरस्य |
| विदुषां | – | (एकवचनम्) | विदुष: |
| राज्ञ: | – | (बहुवचनम्) | राज्ञाम् |
| याचकेभ्य: | – | (एकवचनम्) | याचकाय |

**प्रश्न 7. अधोलिखितशब्दानाम् आधारेण वाक्यनिर्माणं कुरुत**

**उत्तर:**

| | | |
|---|---|---|
| एकदा | – | माघ: एकदा निर्धन: जात:। |
| प्रभूतं | – | नृप: तस्मै प्रभूतं धनं ददाति। |
| विंशति: | – | तत्र विंशति: जना: सन्ति। |
| त्रय: | – | माघे त्रय: गुणा: सन्ति। |
| यदा-तदा | – | यदा राकेश: आगमिष्यति तदा अहं गमिष्यामि। |
| तथैव | – | मोहनोऽपि तथैव कार्यं करोति। |
| कति | – | तत्र कति बालका: पठन्ति? |
| अपरं | – | अस्य अपरं नाम 'भिन्नमाल' इति वर्तते। |

**प्रश्न 8. अधोलिखितानाम् उत्तराणामाधारेण प्रश्ननिर्माणं कुरुत**

**उत्तर:** उदा. – माघस्य जन्म भीनमालनगरे अभवत्।

प्रश्न माघस्य जन्म कुत्र अभवत् ?

1. भीनमालनगरस्य पुरातनं नाम भिन्नमाल इति आसीत्।
प्रश्न भीनमालनगरस्य पुरातनं नाम किम् आसीत्?

2. माघः विद्वान् दानशीलः च आसीत्।
प्रश्न माघः कीदृशः आसीत्?

3. शिशुपालवधे मुख्यरूपेण वीररसः अस्ति।
प्रश्न शिशुपालवधे मुख्यरूपेण कः रसः अस्ति?

4. कालिदासस्य मेघदूतं प्रसिद्धम् अस्ति।
प्रश्न कस्य मेघदूतं प्रसिद्धम् अस्ति?

5. माघस्य पितामहः सुप्रभदेवः आसीत्।
प्रश्न माधस्य पितामहः कः आसीत्?

# अन्य महत्त्वपूर्ण प्रश्नोत्तर

**1. शब्दार्थाःप्रश्न**

**1. अधोलिखितशब्दानाम् हिन्द्याम् अर्थ लिखत**

**उत्तर:**

| | शब्दाः | | अर्थाः |
|---|---|---|---|
| (i) | मरुभूमिः | – | रेगिस्तान। |
| (ii) | विदुषाम् | – | विद्वानों की। |
| (iii) | पुरातनम् | – | प्राचीन। |
| (iv) | प्रभूतम् | – | अत्यधिक। |
| (v) | प्रशस्यः | – | प्रशंसा के योग्य |
| (vi) | वयः | – | आयु। |
| (vii) | दृष्ट्वा | – | देखकर। |
| (viii) | भा | – | कान्ति। |
| (ix) | रश्मिः | – | किरण। |
| (x) | हिमधाम्नि | – | चन्द्रमा के। |
| (xi) | गिरिः | – | पर्वत। |
| (xii) | वारणेन्द्रः | – | गजराज। |
| (xiii) | लीलाम् | – | शोभा को। |
| (xiv) | महीयांसः | – | महापुरुष। |
| (xv) | प्रकृत्या | – | स्वभाव से। |

**2. प्रश्ननिर्माणम्**

**प्रश्न-रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत**

1. राजस्थानं वीराणां भक्तानाञ्च भूमिः अस्ति।
2. भारविकविः किरातार्जुनीयस्य रचयिता अस्ति।
3. शिशुपालवधस्य रचयिता माघः अस्ति।
4. माघस्य पितामहः सुप्रभदेवः आसीत्।

5. माघस्य पितुः नाम दत्तकः आसीत्।
6. पितृवत् माघोऽपि विद्वान् दानशीलः च आसीत्।
7. राजा भोजः माघस्य आश्रयदाता आसीत्।
8. एकदा माघः निर्धनः जातः।
9. भोज: तस्यै प्रभूतं धनं ददाति।

10. सा मार्गे याचकेभ्यः सर्वं धनं ददाति।
11. अस्मिन् महाकाव्ये 1650 श्लोकाः सन्ति।
12. शिशुपालवधस्य नायकः श्रीकृष्णः अस्ति।
13. माघे त्रयो गुणाः सन्ति।

14. माघः सर्वानपि अन्यान् कवीन् अतिशेते।
15. नवसर्गगते माघे नवशब्दो न विद्यते।
16. भारवेः शोभा माघस्योदयात् पूर्वमेव अस्ति।
17. महीयांसः प्रकृत्या मितभाषिणः भवन्तिः।

18. सर्वः स्वार्थं समीहते।
19. समय एवं करोति बलबलम्।
20. मधुकराङ्गना निभ्रताक्षरमुज्जगे।

**उत्तर:** प्रश्ननिर्माणम्

1. राजस्थानं केषां भूमिः अस्ति?
2. भारविकविः कस्य रचयिता अस्ति?
3. शिशुपालवधस्य रचयिता कः अस्ति?
4. माघस्य पितामहः कः आसीत्?
5. माघस्य पितुः नाम किम् आसीत्?

6. पितृवत् माघोऽपि कीदृशः आसीत्?
7. कः माघस्य आश्रयदाता आसीत्?
8. एकदा माघः कीदृशः जातः?
9. भोजः तस्यै किम् ददाति?
10. सा मार्गे केभ्यः सर्वं धनं ददाति?

11. अस्मिन् महाकाव्ये कति श्लोकाः सन्ति?
12. शिशुपालवधस्य नायकः कः अस्ति?
13. माघे कति गुणाः सन्ति?
14. माघः सर्वानपि कान् अतिशेते?
15. नवसर्गगते माघे किम् न विद्यते?

16. भारवेः शोभा कस्मात् पूर्वमेव अस्ति?
17. महीयांसः प्रकृत्या कीदृशाः भवतिः?
18. सर्वः किम् समीहते?

19. समय एव कीदृशं करोति?
20. का निभ्रताक्षरमुज्जगे?

**3. भावार्थलेखनम्**

**प्रश्न 3. अधोलिखितवाक्यानां हिन्दीभाषाया भावार्थ लिखत**

(i) माघे सन्ति त्रयो गुणाः।
(ii) नवसर्गगते माघे नवशब्दो न विद्यते।
(iii) तावद् भी भारवेर्भात यावन्माघस्य नोदयः।
(iv) महीयांसः प्रकृत्या मितभाषिणः।
(v) समय एवं करोति बलाबलम्।

**उत्तर:** (i) माघे सन्ति त्रयो गुणाः।

भावार्थ-प्रस्तुत सूक्तकथन 'महाकविः माघः' शीर्षक पाठ से उद्धृत है। इस कथन के द्वारा माघ के वैशिष्ट्य को दर्शाते हुए कहा गया है कि महाकवि माघ के शिशुपालवध महाकाव्य में उपमा, अर्थगौरव तथा पदलालित्य ये तीनों ही गुण एक साथ पाये जाते हैं।

संस्कृत साहित्य में कालिदास की उपमा, भारवि का अर्थगौरव तथा दण्डी का पदलालित्य प्रसिद्ध है, किन्तु माघ के काव्य में ये तीनों ही गुण प्रसिद्ध हैं। माघ का कलापक्ष एवं भावपक्ष दोनों ही अत्यन्त प्रशंसनीय हैं।

**(ii) नवसर्गगते माधे नवशब्दो न विद्यते।**

भावार्थ-प्रस्तुत कथन 'महाकविः माघः' शीर्षक पाठ से उद्धृत है। महाकवि माघ के पास विपुल शब्द-भण्डार था। उन्होंने अपने शिशुपालवध महाकाव्य के प्रथम नौ सर्गों में ही अपने अक्षय शब्द कोष का पूर्ण प्रदर्शन कर दिया है। माघ ने एक भाव के लिए अथवा भिन्न-भिन्न अर्थ के लिए नवीन शब्दों का प्रयोग किया है। इससे उनके महाकाव्य के प्रथम नौ सर्गों में ही इतना शब्द-भण्डार समाया हुआ है कि इसके बाद कोई नवीन शब्द शेष नहीं रहता है।

**(iii) तावद् भा भारवेर्भात यावन्माघस्य नोदयः।**

भावार्थ-प्रस्तुत सूक्तकथन 'महाकविः माघः' शीर्षक पाठ से उद्धृत है। इस कथन में प्रयुक्त ' भारवि' शब्द के दो अर्थ हैं—सूर्य एवं भारवि नामक कवि। इसी प्रकार 'माघ' शब्द के भी दो अर्थ हैं—'माघ मास एवं 'माघ' नामक कवि। अतः प्रस्तुत सूक्त का भाव यह है कि जिस प्रकार सूर्य के तेज का प्रभाव तब तक ही रहता है, जब तक माघ मास का आगमन नहीं होता अर्थात् माघ माह की शीतलता में सूर्य का तेज

प्रभावहीन हो जाता है, उसी प्रकार भारवि कवि का वैदुष्य भी माघ कवि के वैदुष्य को देखने पर प्रभावहीन हो जाता है। अर्थात् माघ कवि भारवि से भी बढ़कर है।

**(iv) महीयांसः प्रकृत्या मितभाषिणः।**

भावार्थ-प्रस्तुत सूक्तकथन 'महाकविः माघः' शीर्षक पाठ से उद्धृत है। मूलतः यह सूक्ति माघ विरचित शिशुपालवध महाकाव्य से अर्थगौरव के उदाहरणार्थ प्रस्तुत की गई है। इसका भाव यह है कि महापुरुष स्वभाव से ही कम बोलने वाले होते हैं। वे अनावश्यक बातें नहीं बोलते हैं। अपितु अत्यन्त सारगर्भित शब्दों में ही अपना मन्तव्य प्रकट करते हैं।

**(v) समय एवं करोति बलाबलम्।**

भावार्थ-प्रस्तुत सूक्तकथन 'महाकविः माघः' शीर्षक पाठ से उद्धृत है, जो मूलतः शिशुपालवध महाकाव्य से माघ के अर्थगौरव के वैदुष्य को दर्शाने हेतु उदाहरण के रूप में दिया गया है। इस सूक्त का आशय यह है कि समय ही प्राणी को बलवान् एवं निर्बल बनाता है।

जब व्यक्ति का अनुकूल समय होता है तब निर्बल भी बलशाली हो जाता है, किन्तु समय प्रतिकूल होने पर बलवान् भी निर्बल हो जाता है।

**4. पाठ्यपुस्तकाधारितं भाषिककार्यम्**

**(क) कर्तृक्रियापदचयनम्प्रश्नअधोलिखितवाक्येषु कर्तृक्रियापदयोः चयनं कुरुत**

(i) सुप्रभदेव: वर्मलातनामकस्य राज्ञ: प्रधानमन्त्री आसीत्।

(ii) माघस्य पिता दत्तकः विद्वान् दानशीलः चासीत्।

(iii) माघस्य पत्नी भोजसमीपे गच्छति।

(iv) भोज: तस्यै प्रभूतं धनं ददाति।

(v) सा गृहं प्रति आगच्छति।

(vi) मार्गे सा याचकेभ्यः सर्वं धनं ददाति।

(vii) माघः बहु-दुःखितः भूत्वा स्वप्राणान् अत्यजत्।

(viii) अस्मिन् महाकाव्ये 1650 श्लोकाः सन्ति।

(ix) माघस्य काव्ये त्रयो गुणाः सन्ति।

(x) माघः सर्वानपि अन्यान् कवीन् अतिशेते।

**उत्तर:**

| | कर्तृपदम् | क्रियापदम् |
|---|---|---|
| (i) | सुप्रभदेवः | आसीत् |
| (ii) | दत्तकः | आसीत् |
| (iii) | पत्नी | गच्छति |
| (iv) | भोजः | ददाति |
| (v) | सा | आगच्छति |
| (vi) | सा | ददाति |
| (vii) | माघः | अत्यजत् |
| (viii) | श्लोकाः | सन्ति |
| (ix) | गुणाः | सन्ति |
| (x) | माघः | अतिशेते |

**(ख) विशेषविशेष्यचयनम्**

**प्रश्न (i) "मरुभूमिः राजस्थानं वीराणां भूमिः।" इत्यत्र विशेषणपदं किम्?**

**उत्तर:** मरुभूमिः।

**प्रश्न (ii) "अत्र प्रसिद्धानि त्रीणि महाकाव्यानि सन्ति"—इत्यत्र विशेष्यपदं किम्?**

**उत्तर:** महाकाव्यानि।

**प्रश्न (iii) "महाकवेः माघस्य जन्म भीनमालनगरे अभवत्' इत्यत्र विशेषणपदं किम्?**

**उत्तर:** महाकवेः।

**प्रश्न (iv) एकदा दानशील: माघः निर्धनः जातः"-इत्यत्र विशेष्यपदं किम्?**

**उत्तर:** माघः।

**प्रश्न (v) अधोलिखितवाक्येषु विशेषण-विशेष्यपदानां चयनं कुरुत**

(अ) राजा भोजः माघस्य आश्रयदाता आसीत्।
(ब) एकदा दानशीलः माघः निर्धनः जातः।
(स) माघस्य पत्नी एकां कवितां स्वीकृत्य भोजसमीपे गच्छति।

(द) मार्गे सा याचकेभ्यः सर्वं धनं ददाति।
(य) रिक्तहस्ता सा गृहम् आगच्छति।
(र) गृहस्य द्वारे बहवः याचकाः आसन्।
(ल) माघः सर्वानपि अन्यान् कवीन् अतिशेते।
(व) द्वयोः काव्ययोः सौन्दर्यं दृष्ट्वा उक्तम्।

**उत्तर:**

| | विशेषणपदम् | विशेष्यपदम् |
|---|---|---|
| (अ) | राजा | भोजः |
| (ब) | दानशीलः | माघः |
| (स) | एकाम् | कविताम् |
| (द) | सर्वम् | धनम् |
| (य) | रिक्तहस्ता | सा |
| (र) | बहवः | याचकाः |
| (ल) | सर्वान् अन्यान् | कवीन् |
| (व) | द्वयोः | काव्ययोः |

**(ग) सर्वनाम-संज्ञाप्रयोगः**

**प्रश्नः अधोलिखितवाक्येषु रेखांकितपदस्य स्थाने संज्ञापदस्य प्रयोगं कृत्वा वाक्यं पुनः लिखत**

1. अस्य अपरं नाम 'श्रीमालक्षेत्रम्' अपि आसीत्।
2. अस्य पिता दत्तकः विद्वान् दानशीलः चासीत्।
3. भोजः तस्यै प्रभूतं धनं ददाति।
4. रिक्तहस्ता सा गृहम् आगच्छति।
5. सः बहु-दुःखितः भूत्वी स्वप्राणान् अत्यजत्।
6. अस्य कथानकं महाभारतात् गृहीतमस्ति।
7. अस्मिन् महाकाव्ये विंशतिः सर्गाः सन्ति।

**उत्तर:**

1. भीनमालक्षेत्रस्य अपरं नाम ' श्रीमालक्षेत्रम्' अपि आसीत्।
2. माघस्य पिता दत्तकः विद्वान् दानशीलः चासीत्।
3. भोजः माघस्य पत्न्यै प्रभूतं धनं ददाति।
4. रिक्तहस्ता माघपत्नी गृहम् आगच्छति।
5. माघः बहु-दुःखितः भूत्वा स्वप्राणान् अत्यजत्।
6. शिशुपालवधस्य कथानकं महाभारतात् गृहीतमस्ति।
7. शिशुपालवधमहाकाव्ये विंशतिः सर्गाः सन्ति।

**प्रश्नः अधोलिखितवाक्येषु सर्वनामपदानां चयनं कृत्वा लिखत**

1. अस्य लेखनी सुललितं माधुर्यपूर्णञ्चास्ति।
2. अयं महाकविर्माघः परमसमादरणीयः।
3. संस्कृतसाहित्ये बृहत्त्र्यामास्य महाकाव्यस्य गणना क्रियते।
4. अयं दृष्ट्वा एव माधः 'घण्टामाघः' इति नाम्ना प्रसिद्धः।
5. तेषामनुसारेण भारवेः शोभा माघस्योदयात् पूर्वमेवास्ति।
6. असौ माघः काव्यकलायामतिनिपुणः आसीत्।
7. महाकाव्यस्यास्य नायकः श्रीकृष्णः।

**उत्तरः**

1. अस्य
2. अयम्
3. अस्य
4. अयम्
5. तेषाम्
6. असौ
7. अस्य।

**(घ) समानविलोमपदचयनम्**

**प्रश्नः अधोलिखितवाक्येषु रेखाङ्कितपदानां समानार्थकपदानि लिखत**

1. राजस्थानं महाकवीनामपि भूमिः अस्ति।
2. भीनमालस्य पुरातनं नाम 'भिन्नमाल' इति आसीत्।
3. माघस्य पिता विद्वान् आसीत्।
4. मार्गे सा याचकेभ्यः सर्वं धनं ददाति।
5. महीयांसः प्रकृत्या मितभाषिणः।
6. समय एवं करोति बेलाबलम्।

**उत्तरः**

1. स्थानम्
2. प्राचीनम्
3. जनकः
4. भिक्षुकेभ्यः
5. महापुरुषाः
6. कालः।

**प्रश्नः अधोलिखितवाक्येषु रेखाङ्कितपदानां विलोमपदानि लिखत**

1. राजस्थानं वीराणां भूमिः अस्ति।
2. दत्तक विद्वान् दानशीलः चासीत्।
3. एकदा माघः निर्धनः जातः।
4. भोजः माघस्य मित्रं आसीत्।
5. सर्वः स्वार्थं समीहते।
6. समय एवं करोति बलाबलम्।
7. माघस्य जन्म भीनमालनगरे अभवत्।

**उत्तर:**

1. कातराणाम्
2. मूर्खः
3. धनिकः
4. शत्रुः
5. परार्थम्
6. अबलम्
7. मृत्युः।